SCANNED

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

त्रयोविंशे वर्षे प्रथमोऽङ्कः

१५ जनवरी, २००१

स्तोत्रकाव्यविशेषाङ्कः

प्रधानसम्पादकः

डॉ० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

सहसम्पादकः

अभिनव शुक्लः, एम०ए०

देववाणी-परिषद्, दिल्ली

६, वाणी—विहारः, नयी दिल्ली—११००१०

(भारतम्)

परामर्शदातृ–मण्डलम्

१. आचार्य श्रीनिवास रथः
२. "अभिराज" डा० राजेन्द्र मिश्रः
३. डा० उमाकान्त शुक्लः
४. डा० विष्णुकान्त शुक्लः
५. डा० भास्कराचार्य त्रिपाठी
६. डा० इच्छाराम द्विवेदी "प्रणवः"

अर्वाचीनसंस्कृतम् (२३/१)

१५ जनवरी २००१ ई०

विषयसूची

विषयः	लेखकः	पृष्ठाङ्कः
१. सम्पादकीयम्	डा० रमाकान्त शुक्लः	१
२. वेदचिन्तनम्	सुश्री नन्दिता सिंघवी	२
३. महाकुम्भे	डा० रमाकान्त शुक्लः	३–४
४. एकविंशशताब्दी-शुभारम्भे	डा० अमीयचन्द्र शास्त्री	३–४
वर्धापनम्	'सुधेन्दुः'	४
५. श्रीवृषभध्वजसपादशतकद्वयी	डा० रामकिशोरमिश्रः	५–४३
६. त्रैस्त्रोतसम्	श्री श्री० सुन्दरराजः	४३–४५
७. श्रीकृष्णस्तोत्रम्	डा० अवधेश पाण्डेयः	४६–४७
८. नीराजनम्	डा० विन्ध्येश्वरीप्रसाद मिश्रः	४८

अर्वाचीनसंस्कृतम्

(R. N. 34554/79)

अर्वाचीनसंस्कृतम् (पंजी. सं. 34554/79)

१. **प्रकाशनस्थानम्**–नयी दिल्ली ।

२. **प्रकाशनकालावधिः**–त्रैमासिकम् ।

३. **सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च**–डॉ० रमाकान्तशुक्लः, भारतीयः, देववाणी–परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली–११००५९

४. **पत्राधिकारिणां नाम्ना सह सङ्केतः**–देववाणी–परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली । डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

१५-१-२००१ ई०

–रमाकान्तशुक्लः

(प्रकाशकः, सम्पादकः)

सम्पादकीयम्

अथानेनाङ्केन प्रविशति एकविंशीं खैष्टीं शताब्दीं, तृतीयां सहस्राब्दीमथ च स्वजीवनस्य त्रयोविंशं वर्षम् 'अर्वाचीनसंस्कृतम्' इतिनामधेयेयं त्रैमासिकी संस्कृतपत्रिका। डा० अमियचन्द्रशास्त्रिणा नूतनशताब्द्यारम्भे 'वर्धापनं' क्रियते भवताम्।

अद्यत्वे तीर्थराजे प्रयागे महाकुम्भमेला आयोजिताऽस्ति। ह्य एव मकरसङ्क्रान्त्यवसरे महाकुम्भपर्वस्नामभूत्। एतत्पङ्क्तिलेखकेन १४.१.२००१ तारिकायां प्रातः दूरदर्शनतः प्रसारितं 'शाहीस्नान'-दृश्यमवलोकितम् तदनु च 'महाकुम्भे' इत्येतच्छीर्षकयुता एका रचना प्रणीता। इयं रचना मया दिल्ली-संस्कृत-अकादम्या २०.१.२००१ तारिकायाम् इन्द्रप्रस्थविश्वविद्यालयप्रेक्षागारे समायोज्यमाने अखिलभारतीयसंस्कृतसम्मेलने प्रस्तोतुमिष्यते। अर्वाचीनसंस्कृतपाठकानां कृते च पूर्वत एव सुलभीक्रियते।

बीकानेरनगरे संस्कृतप्राध्यापिका सुश्री नन्दिता सिंघवी 'वेदचिन्तनम्' इत्यस्यां कवितायां वेदानां गरिमाणं निर्दिशति।

इतः परं स्तोत्रचतुष्टयं प्रकाश्यते। डा० रामकिशोरमिश्रेण मम सकाशे २०४४ तमे वैक्रमाब्दे माघमासे पूर्णिमायां पद्यमयेन पत्रेण साकं 'श्रीवृषभध्वजशतकद्वयम्' नाम स्तोत्रकाव्यं प्रकाशनार्थं प्रेषितमासीत्। तत्र २०१ तमेऽन्तिमे पद्ये कविना सूचितमासीत् यत्तस्य द्विशतपद्यात्मकस्य स्तोत्रस्य पूर्तिः २०४३ तमे वैक्रमाब्दे चैत्रपूर्णिमादिने सोरोंनगरे जाता—

"चैत्रपूर्णिमादिने वैक्रमे कालोदधिखात्माब्दे (२०४३)
भारत उत्तरप्रदेश एटा-सोरोंपुरे वासवान्।
होतीलाल-कलावतीसुतो रामकिशोरमिश्र इह
श्रीवृषभध्वजशतकद्वयमिति वसन्ततिलके कृतवान्॥"

कैश्चित्कारणैरस्य स्तोत्रस्य प्रकाशनमर्वाचीनसंस्कृते कर्तुं नापार्यते। २७-७-२००० तारिकायां पुनः डा० मिश्रमहाभागस्य पत्रेण साकं परिवृद्धं तत्स्तोत्रं 'श्रीवृषभध्वजसपादशतकद्वयी'ति नाम्ना मया लब्धं यस्यान्तिमेन पद्येन ज्ञायते यदस्य स्तोत्रस्य पञ्चाशत्पद्यानां रचना कविना 'खेकड़ा'-ग्रामे कृता (द्रष्टव्यं २२६ तमं पद्यम्) अस्मिन् स्तोत्रकाव्ये कविना देशस्य विश्वस्य च प्रसिद्ध शिवलिङ्गानां कीर्तनं कृतं किञ्च स्वस्य भक्तानां च मङ्गलं काङ्क्षितम्। भक्तिरसेन साकं राष्ट्रियभावना विश्वमङ्गलभावना चात्र साक्षात्कर्तुं शक्यते। शिवरात्र्या अवसरे श्रद्धालूनां कृतेऽयमुपहारः।

श्री०श्रीसुन्दरराजमहाभागेन 'त्रैस्रोतस'मित्यत्र पृथ्वीवृत्तेन त्रिपथगायाः स्तुतिः कृता। डा० अवधेशपाण्डेयस्य 'श्रीकृष्णस्तोत्र'मर्वाचीनसंस्कृते प्रथमा प्रविष्टिः। डा० विन्ध्येश्वरीप्रसादमिश्रविनयस्य 'नीराजनं' सुललितभाषया श्रीकृष्णं स्तौति।

अस्यामेव मङ्गलमय्यां सामय्यां ४८ पृष्ठाणामवसितिर्जाता। अतो 'देववाणी-परिषद्वार्ता' 'संस्कृतजगद्वार्ता' चाग्रिमेऽङ्के प्रकाशयिष्येते।

अस्मादङ्कात् श्री अभिनव शुक्लः अवैतनिकसहसम्पादकरूपेण प्रधानसम्पादकस्य साहाय्यं कर्तुं नियुक्तोऽस्ति। परमेश्वरोऽस्योत्साहं कर्मठतां च वर्धयतु!

नूतनं वर्षं, नूतनसहस्राब्दयुता शताब्दी च शुभे भूयाताम्।

'रमालयः' आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९
१५.१.२००१

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

वेदचिन्तनम्

–सुश्री नन्दिता सिंघवी
व्याख्याता संस्कृतविभागे, राजकीय डूंगर महाविद्यालयः,
बीकानेर, राजस्थान-३३४००१

हृदि
यदा न वेदचिन्तनम्
न वर्तते
तदा वेदनम् !
श्रद्धया
सदा वेदशरणम्
तदा विमलदीप्त्या
राजते वदनम् !!
प्रकृतेः
प्रत्यङ्गं वन्दनम्
तदा अन्तर्मनः
अनुभवति नन्दनम्
मधुरम्
आपो वातोऽन्नम्
वर्षति
स्नेहं
पिता गगनम्
लभे
आत्मनः परमज्ञानम्
जाने
सृष्टौ विज्ञानम्
देवप्रशिषे
यस्य चरणम्
मननीयं तस्य उद्बोधनम्
सत्यधर्माय
क्रतुः प्रतिक्षणम्
तदा वर्तते जीवनममृतम् !!!

महाकुम्भे

—डॉ० रमाकान्त शुक्लः
'रमालयः' आर ६, वाणी विहारः, नयी दिल्ली-११००५९

अपूर्वं दृश्यते दृश्यं प्रयागीये महाकुम्भे ।
नृणामास्था जलधिरूपा प्रविष्टास्ते महाकुम्भे ॥

सहस्राब्द्याः शंताब्द्या नूत्नवर्षस्याथवारम्भे ।
जगत्स्नाति त्रिवेण्याः पावने सलिले महाकुम्भे ॥

इमे नागा इमे वैरागिणः सङ्गमजले स्नातुम् ।
महोत्साहास्तथान्ये साधवः प्राप्ता महाकुम्भे ॥

न केवलमागता भरतावनेर्विविधप्रदेशेभ्यः ।
अपितु सम्पूर्णजगतो मानवाः प्राप्ता महाकुम्भे ॥

किमास्ते तद्रहस्यं यज्जनान् योजयति भिन्नहृदः ।
परीक्षन्ते समीक्षन्ते जगद्विज्ञा महाकुम्भे ॥

किमयमास्तेऽन्धविश्वासोऽथवास्था बद्धमूला यत् ।
जनाः शिशिरे जले शीतेऽवगाहन्ते महाकुम्भे ॥

स्थितः सूर्यस्तथा चन्द्रो मकरराशौ गुरुर्मेषे ।
वृषे वा, द्वादशाब्दानन्तरं स्नामो महाकुम्भे ॥

हरिद्वारे तथोज्जयिनीनगर्यां नासिकक्षेत्रे ।
प्रयागे तीर्थराजे दृश्यते मेला महाकुम्भे ॥

विना विज्ञापनं नृणां महासम्मर्द आगच्छन् ।
मनोमोक्षं महानन्दं च लभतेऽयं महाकुम्भे ॥

अगच्छन्तः प्रयागं किञ्च न स्नात्वापि गङ्गायाम् ।
पितुर्मातुर्गुरोः सेवापराः पूताः महाकुम्भे ॥

अथो ये दूरतो गङ्गां स्मरन्तोऽहर्निशं लोकाः ।
परोपकृतिव्रतस्थास्तेऽपि धन्या वै महाकुम्भे ॥

अहो मे राष्ट्रगरिमा ! येन जीवामो वयं सर्वे ।
विभिन्ना एकतां याता मिलामो वै महाकुम्भे ॥

किशोरा बालका वृद्धा युवानः स्नान्त्यथो प्रौढाः ।
किशोर्यो बालिका वृद्धा युवत्यो वै महाकुम्भे ॥

भवेद्राष्ट्रं समृद्धं वञ्चकैः शून्यं प्रगतिपरकम् ।
समस्तं विश्वमास्तामेकनीडं वै महाकुम्भे ॥

प्रभु परमेश्वरं विनतेन शिरसा प्रार्थयामो यत् ।
समे सद्बुद्धिसत्कर्मान्विता स्युर्वै महाकुम्भे ॥

पुराताननूतनाभ्यामिह मिलित्वा साध्यते योगः ।
रमाकान्तावलोकय नूतनामाभां महाकुम्भे ॥

रमाकान्तस्तु न प्राप्तस्त्रिवेण्याः सङ्गमक्षेत्रे ।
परं लभतेऽनया गीत्याभिषेकायं[1] महाकुम्भे ॥

रचनातिथिः १४-१-२००१

---

१. अयः शुभावहो विधिस्तम् अयम्। स्नानशुभकर्म इत्यर्थः।

❖❖❖

एकविंशशताब्दी-शुभारम्भे वर्धापनम्

-डा० अमियचन्द्र शास्त्री 'सुधेन्दुः'
एम०ए०, पी-एच०डी०, साहित्यशास्त्री, साहित्याचार्यः,
संस्कृत-प्रवक्ता, हिन्दू इण्टर कालेज, कोसीकलां (मथुरा)-२८१४०३

एकविंशे शताब्दीशुभारम्भके
लभ्यतां सौख्य-सम्पत्ति-कीर्त्यादिकम् ।
दारपुत्रैश्च मित्रैः समं बन्धुभि-
र्विश्वमेकं कुटुम्बं भवेन्मे मतिः ॥

श्रीवृषभध्वजसपादशतकद्वयी

रचयिता : डॉ० आचार्य रामकिशोरमिश्रः
२९५, पट्टीरामपुरे पत्रालयसमीपे
खेखड़ा (बागपत) उ०प्र०-२०११०१

तस्मै नमो भगवते वृषभध्वजाय ।
शम्भुं शिवं पशुपतिं जगदेकनाथं
शर्वं मृडं गिरिशमीश्वरमादिदेवम् ।
वन्दे वसन्ततिलकेन हि छन्दसा यं
तस्मै नमो भगवते वृषभध्वजाय ॥१॥

देवासुरैर्जलधिमन्थननिर्गतं यत्,
प्राप्तं विषं तदपि नीलगलोऽपिबद्यः ।
सिद्धा च यस्य जगतीविषपायिता सा,
तस्मै नमो भगवते वृषभध्वजाय ॥२॥

यः कथ्यते गरलवेगहरस्त्रिशूली,
स्थाणुः कपाललसितश्च स चन्द्रमौलिः ।
यं सर्पहारमधुना मनसा भजामि,
तं भर्गमेव भगवन्तमहं नमामि ॥३॥

यं नारदादिमुनिभिः स्तुतशुभ्रकीर्तिं,
यं शिञ्जिनीकृतकृशोरगनाथचापम् ।
वन्दे गिरीशमिह दग्धपुरत्रयं यम्,
तं शङ्करं स्वहृदये मनसा स्मरेयम् ॥४॥

श्रीसंयुतेऽत्र[1] नगरेऽपि च जम्बुभूमौ,
लेहे त्रिशूलभुवि वन्द्यमनन्तनागे ।
पुच्छे च यं गिरिजनाः शरणं प्रयान्ति,
तं पूजयन्त इह भक्तजना विभान्ति ॥५॥

संसिद्धिमन्तमृतुमन्तममृत्युमन्तम्,
प्रेतादिमन्तमहिमन्तमनादिमन्तम् ।
कैलासवन्तमधुना यमहं स्मरामि,
तं शर्वमेव भगवन्तमहं भजामि ॥६॥

गुप्तेश्वराय गिरिशाय दिगम्बराय,
रूपेश्वराय वसुमूर्तिविभूषिताय ।
योगेश्वराय विधुभूषितमस्तकाय,
तस्मै नमो भगवते वृषभध्वजाय ॥७॥

पत्नीं सतीं कनखलेश्वरदक्षयागे
दग्धां हि हानिकरणान्निजनाशभागे।
संश्रुत्य दक्षमवधीच्छ्वशुरं निजं यः
शत्रून् विनाशयतु वै भगवान् स सद्यः ॥८॥

शूली पुनः सुरगणार्चनया प्रसन्नः,
संस्थाप्य वस्तजशिरः श्वशुरस्य देहे ।
यो जीवितं तमकरोदिह शल्यकर्मा,
पापं शृणातु निखिलं भगवान् स शर्मा ॥९॥

ज्योतिर्मठेऽपि च नरेन्द्रपुरे चमोल्याम्,
गोपेश्वरे सुतक उत्तरकाशिकायाम् ।
कुर्वन्ति यस्य मनुजा जयकारशब्दान्,
तांस्त्रायते स भगवानिह नित्यमब्दान् ॥१०॥

---

१. श्रीसंयुते नगरे=श्रीनगरे।

यं कल्पवृक्षकुसुमार्चितपादयुग्मं
यं भाललोचनकृशानुविदग्धमारम् ।
यं कुण्डलीकृतभुजङ्गपतिं स्मरामि,
तं मोक्षदं प्रमथनाथमहं भजामि ॥११॥

सा कथ्यते जगति यस्य जटा कपर्दः,
सिद्धा सभाजनगणाः प्रमथाश्च यस्य ।
हारा गलस्य भुजगाश्च धनुः पिनाक-
स्तस्मै नमो भगवते वृषभध्वजाय ॥१२॥

तेजः प्रभाकिरणवन्तमनैक्यवन्तम्,
पुण्यात्मवन्तमिह चाऽव्ययभूतवन्तम् ।
देवं स्मरामि यमहं मृतघट्टवन्तम्,
शर्वं नमामि तमहं गलनागवन्तम् ॥१३॥

भूतेश्वराय बहुभूतिशरीरभाय,
सोमेश्वराय मृगचर्मविभूषिताय ।
ज्ञानेश्वराय वरदाय सतीश्वराय,
तस्मै नमो भगवते वृषभध्वजाय ॥१४॥

देवाधिराज इह तारकतापितः स
उन्मादकं प्रतिहवानथ कामदेवम् ।
देवस्य यस्य खलु खण्डयितुं समाधिम्,
दूरीकरोति भगवान् स हि सर्वमाधिम् ॥१५॥

चञ्चालकं प्रणयिनां मनसां स्मरं स्व-
मुन्मील्य वह्निकिरणं नयनं तृतीयम् ।
तं भस्मसादकृत तापसनाशकं य-
स्तस्मै नमो भगवते वृषभध्वजाय ॥१६॥

यः प्रार्थनेन च रतेर्हि विलापवत्याः,
कायेन हीनमपि तं मदनं प्रवेश्य ।
साङ्गं दयालुरकरोच्छ्वसतां शरीरे,
व्याप्नोति कीर्तिरिह तस्य जगत्समीरे ॥१७॥

आकाशकेशमिह केऽपि दिगम्बरं तं
भीमं वदन्ति भयकायमनार्यदेवम् ।
यं वामदेवमधुना हृदये करोमि,
तं शङ्करं हि भगवन्तमहं प्रणौमि॥१८॥

गङ्गाऽमृतैरथ हिरण्यनदाऽम्बुभिश्च
ताप्तीजलैश्च यमुनाऽमृतसिन्धुनीरैः ।
गोदावरीप्रभृतिजाऽम्बुभिरर्च्यते य-
स्तस्मै नमो भगवते वृषभध्वजाय ॥१९॥

मृत्युञ्जयं त्रिनयनं त्रिपुरान्तकं च,
भर्गं च खण्डपरशुं प्रमथाधिपं च।
भूतेश्वरं यमधुना शरणं प्रपद्ये,
काव्यानि कर्तुमिह तेन हरेण गद्ये[२] ॥२०॥

प्रेतादिभूतगणसैनिकरक्षकाय,
लोकज्वरादिहरणाय गतिप्रदाय ।
भक्त्या स्वनाम भजतामृणहारकाय,
तस्मै नमो भगवते वृषभध्वजाय ॥२१॥

चम्बा-चिनाव-शिमलादिहिमाचलेषु,
चण्डीगढे च गुरुदासपुरे मनाल्याम् ।
यः स्मर्यते जनमनस्सु जलन्धरेऽपि,
तं पूजयन्ति शिवमत्र जनाः समेऽपि ॥२२॥

---

२. गद्ये=कथ्येऽहम्।

गङ्गाधरं स्मरहरं भवमन्धकारिं
श्रीकण्ठमुग्रमपि जीवदयं गिरीशम् ।
ईशानमीशमधुना यमहं स्मरामि,
तं शूलिनं हि भगवन्तमहं नमामि ॥२३॥

यः प्रार्थितोऽसुरभयेन विभीतदेवै-
स्तत्तारकासुरविनाशकजन्म कर्तुम् ।
गौरीं व्यवाहयदिहाऽचलराजपुत्रीम्,
तस्मै नमो भगवते वृषभध्वजाय ॥२४॥

खञ्जः सुरः खुरणसः खरणश्च कश्चित्,
कुब्जश्च कोऽपि कुकरो बलिरोऽवनाटः।
प्रज्ञुश्च यस्य वरयात्रिषु गण्यते स्म,
तैर्निर्जरैः स भगवान् बहु मन्यते स्म ॥२५॥

खर्वाश्च केचन तु संहतजानुकाश्च
पृश्निश्च तेषु विरलश्च तथोर्ध्वजानुः ।
मुण्डोऽपि यस्य वरयात्रिषु कोऽपि दृष्टः,
रूपेषु तेषु भगवान् कृपया स वृष्टः ॥२६॥

पिप्लुश्च कोऽपि बलिभस्तिलकालकश्च
कासी च कोऽपि विरलः क्षुतवेगरोगी ।
शोषी च कोऽपि वरयात्रिषु यस्य यातः,
तैरद्भुतैः स भगवान् गिरिशोऽपि भातः ॥२७॥

काणाश्च मूकवधिरा अपि वृक्णहस्ताः,
श्रोणाश्च कर्णरहिता गतनासिकाश्च ।
स्त्रामाश्च यस्य वरयात्रिवरा अपाङ्ग-
स्तस्मै नमो भगवते वृषभध्वजाय ॥२८॥

क्षीबश्च कोऽपि कनकव्यसनी विरागी,
कश्चिद् व्रणी तदितरः पिटकी च पागी ।
काठी च यस्य वरयात्रिषु कोऽपि लब्धः,
काव्येन सोऽत्र भगवान् कविना निबद्धः ॥२९॥

कश्चिच्च तुन्दिलसुरो बलवानमांसो
बालश्च कोऽपि तरुणः स्थविरश्च कोऽपि ।
क्लीबोऽपि यस्य वरयात्रिषु दृश्यते स्म,
वृन्दारकैः स भगवान् भव इष्यते स्म ॥३०॥

कुष्ठीश्वरो गलितपादकरोऽपि कश्चित् ,
श्वित्री परश्च बहुचित्रविचित्रदेही ।
प्रच्छर्दिकी च वरयात्रिषु यस्य कोऽपि,
देवेषु तेषु विकलः स मतो वरोऽपि ॥३१॥

ग्लानाश्च केऽपि विकृता विकलाङ्गदेवाः,
उन्मादवानपि च तेषु कफी च कश्चित् ।
पिल्लोऽपि यस्य वरयात्रिषु कोऽपि दृष्टः,
वृन्दारकेषु विकृतः स च नो निकृष्टः॥३२॥

दुर्नामकी तदपरश्च परो निबन्धी,
नारीव्रणी तदितरश्च विपादकी च ।
कण्डूकरोऽपि वरयात्रिषु यस्य कोऽपि,
तैर्दानवारिभिरहो ! न मतो न सोऽपि ॥३३॥

न्युब्जोऽपि कोऽपि च सुरो बहुदद्रुरोगी,
कश्चिच्च वातविकलो बहुरोगभोगी।
अन्यश्च यस्य वरयात्रिषु वृद्धनाभिः,
दृष्टः स वृद्धयुवबालकबालिकाभिः ॥३४॥

आत्मम्भरिश्च विजयाव्यसनी च कश्चित्,
सर्वान्नभोजनिभृतः क्षुधितः परश्च ।
चण्डश्च यस्य वरयात्रिषु कोऽपि गुप्त-
स्तस्मै नमो भगवते वृषभध्वजाय ॥३५॥

पैशाचसैन्यमुखवर्णितवैभवाय,
गङ्गापवित्रसलिले कृतमज्जनाय ।
सिद्धिप्रदाय भजतां समशर्मदाय,
तस्मै नमो भगवते वृषभध्वजाय ॥३६॥

मेषानजांश्च महिषान् वृषभांश्च केचिद्
आरूढवन्त इतरे तुरगाँश्च कोलान् ।
सिंहस्थितोऽपि वरयात्रिषु यस्य कोऽपि,
तेजस्विदेवपुरुषो गणितो न सोऽपि ॥३७॥

शृङ्गी रिटिर्वृषभराडथ नन्दिकेश-
स्तुण्डी जरद्गववरो वृषराजभृङ्गी ।
नन्दी गवेन्द्र इह वाहनमस्ति यस्य,
भक्तिं करोति हृदि नो भगवान् स कस्य?॥३८॥

वैरूप्यवन्तमपि चाऽक्षररूपवन्तम्,
सत्कीर्तिमन्तमविनाशिविभूतिमन्तम् ।
यं धर्मवन्तमधुनाऽत्र भजे महेशम्,
तं नौमि दक्षतनयाहृदयाधिपेशम् ॥३९॥

हालाहलस्य विषताव्यपनोदनाय,
शीतत्वदः शिरसि येन धृतः स इन्दुः ।
यं लोकपं च विषवैद्यमहं भजामि,
तं धूर्जटिं हि भगवन्तमहं नमामि ॥४०॥

यो मल्लिकार्जुन इहाऽवति शैलसंस्थं,
नागेश्वरं तमथ दारुवने प्रणौमि ।
धृष्णीश्वरं यमिह नौमि शिवालयस्थं,
तं सर्पनाथमधुना हृदये करोमि ॥४१॥

स्वर्गाऽपवर्गदमनन्तयशोविभादं
सर्वप्रपञ्चहरमव्ययकालकण्ठम् ।
यं भक्तवत्सलमहं हृदये भजामि,
कैलाशनाथमिह तं शरणं व्रजामि ॥४२॥

आवासपर्वतनतोन्नतशृङ्गभागे
कालं बहुं नयति यो रतिवान् स्वपत्न्याम् ।
स्वः कार्तिकेय इह येन सुतः प्रसूतः,
सर्वान् सुरक्षतु शिवः स सदा प्रभूतः ॥४३॥

स्कन्धश्च यस्य तनयः शिखिवाहनोऽस्ति,
पत्नी हिमाचलसुता प्रियपार्वती सा ।
नन्दी च यस्य वृषभो गतिवाहकोऽत्र
तं शङ्करं स्वहृदये भजते न कोऽत्र ? ॥४४॥

ध्वंसी क्रतोरपि भवश्च कृशानुरेताः,
देवो महानिह बभूव स कृत्तिवासाः।
यं ह्यष्टमूर्तिमधुना हृदये स्मरामि,
तं शर्वमेव भगवन्तमहं महामि ॥४५॥

सत्यार्थवन्तमथ पन्नगहारवन्तम्,
रुद्राक्षवन्तमिह चित्रकचर्मवन्तम् ।
गौरीकरग्रहणवन्तमहं भजे यम्,
श्रद्धां तु तं प्रति कदापि नहि त्यजेयम् ॥४६॥

आयुष्मते स्मृतिमते गिरिजाधवाय,
ज्योतिष्मते मतिमते जगदीश्वराय ।
ऊर्जस्विने प्रबलिने सुजटाधराय,
तस्मै नमो भगवते वृषभध्वजाय ॥४७॥

द्वारे[३] हरेः कनखले ऋषिकेशभूमौ,
ग्रामेषु च त्वमरनाथगुहाधरायाम् ।
लोकाः सहारणपुरेऽपि च यं जयन्ति,
तं शूलिनं स्वहृदये मनसा स्मरन्ति ॥४८॥

श्रद्धालुभक्तपुरुषाः प्रतिवर्षमेव,
गच्छन्ति ये त्वमरनाथगुहां समेताः ।
यत्र प्रभुं हिमभवं प्रणमन्ति ते यम्,
तं शङ्करं हि भगवन्तमहं भजेयम् ॥४९॥

ते श्रावणे सलिलशीतलपूर्णिमायां
कैलासनाथशिवदर्शनमाप्नुवन्ति ।
यश्चन्द्रतुल्यहिमरूपमुपैत्युमेशः,
भक्तेषु सोऽत्र दयतां भगवान्महेशः ॥५०॥

द्वैमातुरो गणपतिर्य उमाप्रियोऽस्ति,
देवाग्रणीः प्रथितमूषकवाहनश्च ।
पुत्रीकृतः स इह येन शिवेन वंशे,
तस्मै नमो भगवते वृषभध्वजाय ॥५१॥

द्वारे गृहस्य नगराजसुताऽवगाहे,
गेहप्रवेशमवरोधयितुं स्थितस्य ।
बालस्य तस्य किल शीर्षमखण्डयद्यः,
शत्रून् विनाशयति वै भगवान् स सद्यः ॥५२॥

---

३. द्वारे हरेः=हरिद्वारे ।

पत्नीरितस्तदनु जीवयितुं शिशुं तं
छित्वा वने कलभमस्तकमात्मशूलात् ।
योऽजीवयद् वपुषि तं खलु योजयित्वा,
तं शूलिनं हृदि भजे शिरसाऽत्र नत्वा ॥५३॥

अङ्गीकृतः स इह येन सुतो द्वितीयः,
बालो गणेश इति सर्वसुरैः प्रपूज्यः।
प्रासादयत्तत उमां दयितां प्रियां यः,
तस्मै नमो भगवते वृषभध्वजाय ॥५४॥

सन्तृप्तिमन्तमिह निर्मलभावभक्तौ,
सन्तुष्टिमन्तमरिसम्मुखदेवशक्तौ ।
यं क्षान्तिमन्तमणिमादिमहं स्मरामि,
तं भर्गमेव भगवन्तमहं भजामि ॥५५॥

ऐश्वर्यभोगरहिताय वृषध्वजाय,
शर्वाय नीलनयनांय महासुराय ।
ऋद्धिप्रदाय जनमङ्गलभूतिदाय,
तस्मै नमो भगवते वृषभध्वजाय ॥५६॥

भार्यादिपुत्रधनधान्यसुखादिमन्तम्,
आहारहीनतपसादिसमाधिमन्तम् ।
वन्दे विभुं शरणदं च यमृद्धिमन्तम्,
ईशं महामि तमहं सुरसिद्धिमन्तम् ॥५७॥

स्थाण्वीश्वरेऽमृतसरःकरनालपुर्योः
पञ्चाम्बुभूमि-हरयाणधरापुरीषु ।
अर्चन्ति यं जनगणा निरतं भवान्या,
तस्मै नमो भगवते वृषभध्वजाय ॥५८॥

यं मत्तहस्तिपतिचर्मकृतोत्तरीयम्
यं पद्मयोनिसुरवन्दितपादपद्मम् ।
वन्दे ह्युमाङ्गपरिशोभितवामभागम्,
सूतां शिवः स भगवान् स्वजनानुरागम् ॥५९॥

भक्ता भजन्ति हरमीशविभुं यमुक्त्वा,
देवाः स्तुवन्ति नितरां च दिगम्बरं तम्।
उग्रोऽपि यो जनदयालुतया प्रसिद्धो
युष्मान् स पातु भगवांस्तपसा समृद्धः ॥६०॥

उद्धारणाय सगराऽन्वयभूपजानां
तुष्टो महोग्रतपसा हि भगीरथस्य ।
गङ्गाममुञ्चदिह यः स्वशिवालकेभ्यः,
स त्रायतां हि भगवान् भवजालकेभ्यः ॥६१॥

कैवल्यकारकवरं भवमोचकं यम्
आनन्दमेव परमं मुनियोगिनां च ।
संहारकं च निखिलस्य शिवं स्मरामि,
तं शङ्करं हि भगवन्तमहं नमामि ॥६२

ओङ्कारनाथमथ यो भजते गिरीशं
प्राप्नोति भक्तपुरुषः स्वमनोगतं सः ।
श्रीवैद्यनाथमिह यं तु भजे परल्यां
तस्मै नमो भगवते वृषभध्वजाय ॥६३॥

ये वृश्चिका गरलदा भुवि नागसर्पाः,
दंशाश्च वर्वणगणा अपि पीतवर्णाः ।
ते मच्छरा[४] इति हि यो वदतीत्थमीशः,
ईशः स पातु भुवनं भगवान् गिरीशः ॥६४॥

---

४. मत्+शराः=मच्छराः (मम शराः)। ५. हस्तरसः=हाथरस।

संघर्षवांश्च रिपुभिः सह यो मनस्वी,
पातुं प्रजाः प्रहरणोऽरिषु यस्तरस्वी,
गत्वा जयी भवति यः समरे यशस्वी,
त्वां पातु स प्रतिदिनं भगवांस्तपस्वी ॥६५॥

ये नास्तिका जगति धर्मविहीनभावाः,
श्रद्धालवः सहृदयाश्च न धार्मिका ये ।
तान्धार्मिकान् सृजति यः शुभभावयुक्तान्,
भक्तान् करोति भगवान् स च पापमुक्तान् ॥६६॥

गोण्डेऽपि लक्ष्मणपुरेऽपि च सारनाथे,
सीतापुरे च भुवि हस्तरसे बरेल्याम् ।
भक्ता भजन्ति हृदि कर्णपुरे यमन्तः,
तं पूजयन्ति शिवशङ्करमेव सन्तः॥६७॥

कण्ठे भुजङ्गवलयं त्वलकेषु गङ्गां
चन्द्रं च धारयति मूर्धनि नग्नराजः ।
अङ्गानि लिम्पति च यः शवभस्मभूत्या,
तं कीर्तयामि भवन्तंमहं स्वगीत्या ॥६८॥

नामानि यस्य शितिकण्ठ-विरूपनेत्र-
सर्वज्ञ-नीलगल-रुद्र-पिनाकिनश्च ।
यं त्र्यम्बकं गजरिपुं मनसा महामि,
तं धूर्जटिं हि भगवन्तमहं नमामि ॥६९॥

शर्वं प्रयोगविशिखं शुभकाण्डवन्तम्,
कुन्तप्रयोगनिपुणं युधि मानवन्तम् ।
स्वान्ते जपामि यमहं गजचर्मवन्तम्,
शर्वं नमामि तमहं करनागवन्तम् ॥७०॥

आयुःप्रदाय भजतामपमृत्युहाय,
कुष्ठादिनाशनविभूतिमहौषधाय ।
संसारभोगरसमज्जिततारकाय,
तस्मै नमो भगवते वृषभध्वजाय ॥७१॥

काम्पिल्य-कृष्णपुरयोरपि[६] मीनपुर्याम्[७]
एटा-बुलन्दपुरयोरपि[८] कान्यकुब्जे[९] ।
सर्वत्र यस्य जनता कुरुते समर्चाम्,
सूतां शिवः स भगवान् हृदि भक्तिचर्चाम् ॥७२॥

भर्गाय भूतपतये गिरिजाप्रियाय,
शैलात्मजासुरमणाय नमः शिवाय ।
दुःखानि नाशयति यश्च सुखानि दत्ते,
रूपं स रक्षति निजं विजयाप्रमत्ते[१०] ॥७३॥

सोमेश्वरो जयतु धूर्जटिरत्र पातु,
गङ्गाधराऽव शिव ! पाहि नगात्मजेश !
सोरोंपुरी तु कविना सह वन्दते यम्,
श्रद्धां तु तं प्रति कदापि नहि त्यजेयम् ॥७४॥

सोरोंपुरेऽत्र तुलसीकविजन्मभूमौ,
योगेश्वरो वसति पश्चिमयोगमार्गे ।
भूतेश्वरो ह्यवति दक्षिणतः पुरीं य-
स्तस्मै नमो भगवते वृषभध्वजाय ॥७५॥

६. कृष्णपुरम्=मथुरा। ७. मीनपुरी=मैनपुरी। ८. बुलन्दपुरम्=बुलन्दशहर।
९. कान्यकब्जम्=कन्नौज। १०. विजया=भांग

गङ्गाजलाशयतटे च वराहकुण्डे,
सोरोंपुरी-बदरिकाश्रम-मध्यभागे ।
सोमेश्वरः स्वनगरे दयते य ईशः,
भक्तिं ददातु स शिवो भगवान् गिरीशः ॥७६॥

भर्गं नमन्ति लहरेश्वरमुत्तरस्यां
स्नात्वा जनाः प्रतिदिनं जलमर्पयन्ति ।
'गङ्गे ! प्रपाहि शिव ! पाहि' च यं वदन्ति,
भक्ताः 'शिवेति जय शर्व!' तमुच्चरन्ति ॥७७॥

आयान्ति भक्तपुरुषा बहुदूरदेशाद्
अङ्गाः कलिङ्गजन-गुर्जर-मालवीयाः ।
गङ्गाभिषेकमिह यस्य च कुर्वते ते,
सर्वे नमन्ति भगवन्तमरं तमेते ॥७८॥

बाला वयस्कतरुणा युवतीयुवानो
वृद्धाश्च जीर्णमहिला गलिताऽऽस्यदन्ताः ।
सर्वे भजन्ति च नमन्ति च यं गिरीशम्,
भर्गं भजामि भगवन्तमहं तमीशम् ॥७९॥

शूलास्त्रवन्तमिषुयुक्तपिनाकवन्तम्,
भूतान्तकं सुतगणेशपरिक्रमान्तम् ।
यं कार्तिकेयसुतवन्तमहं जपामि,
तं पार्वतीश्वरमहं शिरसा नमामि ॥८०॥

वातादिरोगशमनाय यशःप्रदाय,
गौरीश्वराय कलिकल्मषनाशकाय ।
देवोत्तमाय सततं करुणाकराय,
तस्मै नमो भगवते वृषभध्वजाय ॥८१॥

सन्तीह यामुनतटस्थवटेश्वरेऽस्मिन्
एकोत्तरं शतमहो ! शिवमन्दिराणि ।
यल्लिङ्गदर्शनमपि प्रददाति पुण्यम्,
तस्मै नमो भगवते वृषभध्वजाय ॥८२॥

भक्ताश्च यामुनजलानि निपातयन्ति
गौरीपतेर्भगवतस्तु शिवस्य शीर्षे ।
सर्वस्य पूरयति यस्त्वभिलाषमीशः,
स त्रायतां जगदिदं भगवान् गिरीशः ॥८३॥

हे पार्वतीश ! जय हे शिव ! शङ्करेति,
यं देहली वदति भारत-राजधानी।
विल्वेश्वरं यमवदन्मयराष्ट्र[११]लोकाः,
तं कीर्तयन्ति मनुजा गतरोगशोकाः ॥८४॥

रूपेश्वरो वसति यश्च पुरे सुराणां
श्रद्धालवे स सततं प्रददाति रूपम् ।
यत्पादसेवनरता हरिनन्दिनीह[१२],
तस्मै नमो भगवते वृषभध्वजाय ॥८५॥

देवालये हरनदस्य तटे सुराणे[१३],
रूपेश्वरं जय शिवेति नमन्ति भक्ताः ।
गौरीपतिं जय हरेति यमुद्वदन्ति,
तं भूतनाथमिह ते परिकीर्तयन्ति ॥८६॥

सर्वान् सुरक्षति शिवः स पुरा-महेशः[१४]
तत्राऽऽगता मुनिवरा अपि भूसुरेन्द्राः ।

---

११. मयराष्ट्रम्=मेरठ। १२. हरिनन्दिनी=हिण्डननदी। १३. सुराणे=मयराष्ट्रमार्गे सुरानानामस्थाने। १४. पुरा-महेशः=पुरामहादेवः (मयराष्ट्रमार्गे स्थानम्)।

गाङ्गं जलं शिरसि यस्य समर्पयन्ति,
शम्भुं शिवं मनसि तं सततं जपन्ति ॥८७॥

आगत्य भक्तमनुजा बहुदूरदेशाद्
दिल्ली-वरोत[१५]-मयराष्ट्रनिवासिनो यम्।
तोयार्पका जय हरेति नमन्ति नित्यम्,
कुर्वन्ति ते हृदि तदर्चनपुण्यकृत्यम् ॥८८॥

वस्त्यां च गोरखपुरे नयनीनगर्यां[१६]
बांदा - हमीरपुर - जौनपुरेषु चुर्के[१७]।
भक्त्या स्मरन्ति मनुजा गिरिजापतिं यम्,
तस्मै नमो भगवते वृषभध्वजाय ॥८९॥

यं विश्वनाथममरा निगदन्ति काश्यां
कालो महानिति[१८] स विश्रुत उज्जयिन्याम्[१९] ।
सौराष्ट्रमत्र यमुवाच हि सोमनाथं
तस्मै नमो भगवते वृषभध्वजाय ॥९०॥

ऐश्वर्यवन्तमगवन्तमुमाङ्कवन्तम्
वेतालभूतगणमुख्यपिशाचवन्तम् ।
यं लोकमुक्तिदमहं शरणं प्रयामि,
तं शङ्करं हि भगवन्तमहं नमामि ॥९१॥

पुण्यात्मकाय निधिदाय वरप्रदाय,
दैत्येशरावणबलादिविवर्धकाय ।
सर्वप्रकारफलदाय महेश्वराय,
तस्मै नमो भगवते वृषभध्वजाय ॥९२॥

---

१५. वरोत=बड़ौत । १६. नयनीनगरी=नैनीताल । १७. चुर्के=चुर्क नामकस्थाने । १८. कालो महान्=महाकालेश्वर । १९. उज्जयिनी=उज्जैनः ।

तं हस्तिनापुरगतं प्रभुपाण्डुकेशं
वन्देऽत्र भूमिपतिकौरवपाण्डवैस्तैः ।
पौरैर्जनैः सह सदा परिपूजितो य-
स्तस्मै नमो भगवते वृषभध्वजाय ॥९३॥

दक्षोऽसुरूप इति बुद्धिरभूत्सती सा,
ज्ञानं शिवस्तदपमानरुषा हरेण ।
प्राणः स येन विफलः कृत इष्टिकार्ये,
दक्षेश्वरं तमथ शङ्करमत्र नौमि ॥

शर्वः क्षितौ, पशुपतेर्यजमानवासः,
रुद्रोऽनले, जलभवो गगने च भीमः ।
ईशान उष्णकिरणे च समीर उग्रो
देवो महाञ्छशिनि चेति शिवान् भजेऽष्टौ ॥९५॥

कुण्ठापुरे स ऋणमोचकदेव आस्ते,
यो भक्तियुक्तमनृणं कुरुतेऽत्र जीवम्।
बुन्देलखण्डजनदेवमहं भजे यम्,
भक्तिं तु तं प्रति कदापि नहि त्यजेयम् ॥९६॥

गङ्गातटे नरवरेऽपि च रामघट्टे,
मुक्तेश्वरे रतिपुरेऽपि च कर्णवासे ।
ग्रामेष्वनन्तनगरेष्वपि यस्य वासः,
सर्वं स पातु भगवान् कृतदुष्टनाशः ॥९७॥

भागीरथीयमुनयोर्व्रजभूमिभागे,
श्रीचित्रकूट-मथुराऽर्गलवासभूमौ[२०] ।
सर्वत्र रक्षति शिवः प्रमथेश्वरो य-
स्तस्मै नमो भगवते वृषभध्वजाय ॥९८॥

---

२०. अर्गलः=आगरा ।

लङ्काधिराजबलिरावणपूजितो यो
रामेण सार्धमजिरे समरस्य नूत्नम् ।
प्रादाच्छिरो हि शरभिन्ननललाटभागे,
तं प्रीणयामि भगवन्तमहं प्रयागे ॥९९॥

वेदाद्यधीतिरपि यस्य जगत्प्रसिद्धा,
शास्त्राप्तिरस्य डमरुध्वनिना च सिद्धा ।
देवं स्मरामि यमहं कविकाव्यवन्तम्
तं भारतं भजति मे गिरिजां नयन्तम्॥१००॥

नित्यात्मकाय विभवे निधिसिद्धिदाय,
कालात्मकाय सुरमानसरञ्जकाय ।
देवाधिदेवमुखयाचितशक्तिदाय,
तस्मै नमो भगवते वृषभध्वजाय॥१०१॥

श्रीचन्द्रशेखरशिवोऽवतु मे शिखां सः,
संरक्ष्यतां मम कपालभृता कपालः ।
मस्तिष्कमत्र गिरिशोऽवतु मस्तकं मे,
शूली श्रुती च नयने अपि पातु शम्भुः॥१०२॥

रांची-गयादिभुवि पाटलिपुत्रभागे,
यं मेदिनीपुरि जनाः कलिकात्तपुर्याम् ।
दुर्गापुरे च जमशेदपुरे नमन्ति
भक्ता हि तं पशुपतिं परिपूजयन्ति ॥१०३॥

आपद्विमोचकवरो विधुशेखरो य-
स्तं भक्तसङ्कटविमोचकमत्र वन्दे ।
गन्धर्वकिन्नरपिशाचपतीश्वराय,
तस्मै नमो भगवते वृषभध्वजाय॥१०४॥

श्रीकण्ठदेव इह रक्षतु कण्ठवर्णान्,
औ कं खगौ च घङहांश्च विसर्गमीशः।
ई चं छजौ झञयशांश्च सतालुदेशान्,
स्थाणुः स्थिरानिह करोतु शिवो ममाऽऽस्ये ॥१०५॥

सर्गस्थितिप्रलयकर्मकृते जगत्याः,
पूर्णात्मने विभवशर्मसुखात्मने च ।
कामान्तकाय गुणिने गुणवर्जिताय,
तस्मै नमो भगवते वृषभध्वजाय॥१०६॥

ऋ टं ठडौ ढणरषांश्च समूर्धदेशान्,
लृं तं थदौ धनलसानपि मे च दन्तान्।
ऊ पं फबौ भमयुतौ पफयोश्च चिह्ने,
सौष्ठं च पात्वधरयुक्तमुमापतिः सः ॥१०७॥

आत्मानमत्र सरितं सलिलं च सत्यं,
शीलं च तीरमिह यो विदधाति, तत्र।
भक्तं करोति विमलं च हि गाहयित्वा,
स्वान्ते स धारयति तं रचनां पठित्वा ॥१०८॥

एदैत्स्वरार्थमव मे शिव ! कण्ठतालू,
ओदौत्स्वरार्थमव मे मृड ! कण्ठमोष्ठौ।
ङं ञं णनौ ममनुनासिकमत्र विन्दुं,
नासाविले च मम रक्ष गिरीश शम्भो !॥१०९॥

भङ्गा दयोन्नतिगताश्च तदात्मनद्यां
ये संयमेन परिघेन नियन्त्रितास्ते ।
यस्तैर्विशोधयति भक्तमनः सकायम्,
तं शूलिनं प्रतिदिनं हि भजे समायम् ॥११०॥

आष्ठौ च कण्ठमपि तं गदितुं वकारं
पात्वत्र खण्डपरशुः कृपया महेशः ।
पातु भ्रुवौ मम च रक्षतु मे कपोलौ,
भ्रूमध्यभागमपि कर्णविले च शर्वः ॥१११॥

मेघालयेऽप्यसमभुव्यरुणाचले च,
नागाऽवनौ मणिपुरे त्रिपुरे च लोकाः ।
शैलाङ्ग-देशपुर-तेजुषु यं भजन्ते,
तं शङ्करं स्वहृदयेषु सदा धरन्ते ॥११२॥

आधारवन्तमिह चाऽऽसनयोगवन्तम्,
संन्यासवन्तमपि लौकिकभोगवन्तम् ।
भर्गं भजे यमिह कुण्डलकर्णवन्तम्,
शम्भुं नमामि तमहं गलसर्पवन्तम् ॥११३॥

नन्दीश्वराय निखिलेश्वरशङ्कराय,
धाराधराय शशिना समलङ्कृताय ।
देवेश्वराय भगदाय सनातनाय,
तस्मै नमो भगवते वृषभध्वजाय ॥११४॥

नागौर-पूगल-चुरू-झुँझुनूधरासु,
कोटापुरे जयति यः पुरि सीकरे च ।
गङ्गापुरे जयपुरेऽप्युदये पुरेऽपि,
भक्ता भजन्ति भगवन्तमुमापतिं तम् ॥११५॥

वन्दे हरं त्रिनयनं च भवं महामि,
रुद्रं नमामि विभवं परिपूजयामि ।
तं स्तौमि नौमि शिवमात्मनि यं भजामि,
तं शङ्करं पशुपतिं शरणं व्रजामि ॥११६॥

श्रीनीललोहित उताऽवतु नेत्रतारे,
घ्राणं च वक्त्रमपि पातु महेश्वरः सः।
वाणीं च पातु रसनामपि मे पिनाकी,
श्रीकण्ठ ईश उत कण्ठगुहां स पातु ॥११७॥

मां त्राहि पाहि भगवन्नयि विश्वनाथ !
देवैस्तथाऽवनिसुरैरपि पूजितेन।
दैत्योऽपि येन निहतोऽत्र खलोऽन्धकः सः,
प्रीतिं खलेऽपि कुरुतां खलभञ्जकः सः॥११८॥

रक्तं वसामुदरमस्थिसमूहमायुः,
स्नायूंश्च मांसमपि वातकफादिपित्तम्।
मज्जादिकं च चिबुकं मम पृष्ठवंशं,
सत्त्वं रजस्तम इहाऽवतु मे स शम्भुः ॥११९॥

वक्षः स्तनौ त्वचमिहाऽवतु कृत्तिवासाः,
शंर्वः स पातु हृदयं च भुजौ च भीमः।
नाभिं च खण्डपरशुः स कटिं च पातु,
लिङ्गं च मे पशुपतिः स च पातु योनिम् ॥१२०॥

चर्मण्वती स्वसलिलैश्च सरस्वती च,
श्रीब्रह्मपुत्रपयसा नदशोणतोयैः ।
कृष्णीयनार्मदजलैः सह चाऽर्चतो यं,
तस्मै नमो भगवते वृषभध्वजाय॥१२१॥

सल्लोकवन्तमपि मङ्गलभक्तिमन्तम्,
सद्योनिमन्तमणुमन्तमभीतिमन्तम् ।
यं स्वस्तिमन्तमधुना शरणं प्रयामि,
तं शर्वमेव भगवन्तमहं नमामि ॥१२२॥

दारिद्र्यदुःखदहनाय यशस्कराय,
सौभाग्यदाय कविवर्णितकीर्तिभाय ।
बुद्धिप्रदाय जगतां सुखसिद्धिदाय,
तस्मै नमो भगवते वृषभध्वजाय ॥१२३॥

बूंदीपुरी-शिवपुरी-विदिशापुरीषु
भूपाल[२१]-सागर-विलासपुरेषु मध्ये[२२]
प्रान्ते च धारनगरे भजते प्रजा यम्,
स्वप्ने विलोकयति सा स्वभवं सकायम् ॥१२४॥

पञ्चाननः स भगवानिह जावरायां,
भक्ताय यः स्वमभयं प्रददाति नित्यम् ।
गङ्गाधरो जगति रक्षति यः स्वभक्तान्,
शूली स तान् सृजति भक्त्यनुरागरक्तान् ॥१२५॥

भूतेश्वरोऽवतु गुदं स तथा नितम्बौ,
पातूरुजानुयुगले अपि मे कपर्दी ।
पात्वङ्गुलीः स च मृडः सनखाः सगुल्फाः,
पादौ सुरक्षतु च मे भगवान्नगेशः ॥१२६॥

यं मन्दसौरनगरे शिवनातटस्थे,
दुर्गे च रायपुर-बस्तरयोः प्रदेशे ।
बीजापुरे गुणपुरे च जना भजन्ते,
तस्य प्रसादवशशान्तिसुखे लभन्ते ॥१२७॥

मां त्राहि भोः पशुपते ! हर हे ! नमस्ते,
भस्माङ्गलेपलसितोऽसि भवोऽसि शम्भो!
शूलेन योऽस्ति निजभक्तविपत्तिहारी,
रक्षां करोतु भगवान् स मनोविहारी ॥१२८॥

---

२१. भूपालम्=भोपालम् । २२. मध्य प्रान्ते=मध्यप्रदेशे ।

स व्योमकेश उत रक्षतु मे तु केशान्
पात्वन्धकारिरिह मामकरोमरन्ध्रम् ।
सर्वज्ञ ईश्वर उताऽवतु मे मनीषाम्,
अज्ञानमेव मनसो हरतां हरो मे ॥१२९॥

कच्छे सुरेन्द्रनगरेऽपि[२३] वटोदरे च,
जूनागढ़े च दमनेऽपि च सोमनाथे ।
अञ्चन्ति गान्धिनगरे च नरा यमीशम्,
तं धारयन्ति हृदयेषु मुदा गिरीशम् ॥१३०॥

आसक्तिमन्तमपरत्र न भक्तिवर्जं
नाहूतिमन्तमुमया पृथगन्यरत्याः ।
संस्तौमि यं मनसि पुत्रसमृद्धिमन्तम्,
भर्गं नमामि तमहं शिवमृद्धिमन्तम् ॥१३१॥

पत्नीव्रताय धनधान्यसुखप्रदाय,
पुत्रप्रदाय भुवनाऽखिलभुक्तिदाय ।
मुक्तेश्वराय निगमाऽऽगमवर्णिताय,
तस्मै नमो भगवते वृषभध्वजाय ॥१३२॥

कामैषणां स्मरहरो हरतां मदीयाम्,
अङ्गान्यथाऽवतु च मे प्रमथाधिपः सः ।
गङ्गाधरोऽवतु सदाऽत्र ममाऽवगाहम्,
स्वास्थ्यं सुरक्षतु च मे भगवान् स भर्गः ॥१३३॥

पात्वत्र मे कुलभवं भगवान् भवः सः,
शत्रून् विनाशय च मे त्रिपुरारिरुद्रः ।
ध्वंसी च दक्षहवनस्य महांश्च देवः,
स ध्वंसयत्वरिगणं हृदयङ्गतं मे ॥१३४॥

२३. वटोदरः=बडौदा।

वर्धिष्णुरत्र हृदि विघ्ननिराकरिष्णुः,
गौरीं प्रियां य इह रन्तुमलङ्करिष्णुः।
भार्योत्पतिष्णुरपि पुत्रसुताजनिष्णुः,
युष्मान् सुरक्षतु शिवः स मनश्चरिष्णुः ॥१३५॥

देवस्य यस्य हि शिवस्य च मन्दिरेषु,
नद्यास्तटे गृहिगृहेषु च वृक्षमूले।
सर्वत्र वै भवति सादरलिङ्गपूजा,
श्रद्धां धरन्ति मनुजा हृदि तत्त्रिशूले ॥१३६॥

यं पूजयन्ति पुरुषा महिलाश्च पुर्यां
मुम्बापुरी - पणजि - नागपुरेष्वजन्ते।
पुण्ये पुरे च कटके भुवनेश्वरे च,
तस्य प्रसादवशशान्तिसुखे लभन्ते ॥१३७॥

सूर्यो विधुश्च जलवह्निधराश्च वायु-
र्होता नभश्च वसुरूपधरः शिवोऽयम्।
अष्टाननो जगति रक्षति यः समस्तान्,
श्रद्धायुतान् स कुरुते भगवान् स्वभक्तान्॥१३८॥

प्राणेश ईश उत हृद्गतिमत्र पातु,
कण्ठस्वरं त्ववतु मे शितिकण्ठशम्भुः।
स्थाणुर्यशो मम करोत्वचलं कवित्वे,
कीर्तिध्वजानवतु मे वृषभध्वजः सः ॥१३९॥

नित्यं करोति विजयामधुसोमपीतिम्,
कृत्वा समाधिमयते मनसीशनीतिम्।
रक्षोमनस्स्वपि च यः कुरुते विभीतिम्,
शर्वः स मे सृजतु चेतसि भक्तिगीतिम् ॥१४०॥

स त्र्यम्बकोऽवतु सदा मम नेत्रशक्तिम्,
ईशोऽष्टमूर्तिरिह रक्षतु काव्यमूर्तीः।
पात्वत्र बालकजयं मम धूर्जटिः सः,
वामाकृतिं मम स रक्षतु वामदेवः॥१४१॥

कालीनदीजभुवनैः शिवनापयोभि-
र्मन्दाकिनीमधुरसैश्च शतद्रुवार्भिः ।
यो वन्द्यते सुरनदीसरयूकबन्धै-
स्तस्मै नमो भगवते वृषभध्वजाय ॥१४२॥

देवाय वन्दितपदाय पुरातनाय,
भक्तिप्रदाय महतां महते मृडाय ।
प्रेतेश्वराय बहुभूसुरपूजिताय,
तस्मै नमो भगवते वृषभध्वजाय॥१४३॥

कोणार्क-शोणपुर-राजपुरेषु चाऽस्के,
यस्याऽलकेषु मनुजा जलमर्पयन्ति ।
भद्राचले गजपतेर्नगरे कलिङ्गे,
तं शम्भुमेव हृदयेषु सदा जपन्ति॥१४४॥

रूपं यशश्च मृदुशब्दमतीवगन्धं
स्पर्शं रसं च शिव शङ्कर! देहि मह्यम्।
प्राणान् प्रवेशय बहिष्कुरु मे त्वपानम्,
व्यानं समानमव शर्व ! तथा ह्युदानम्॥१४५॥

पश्चान्नमामि पुरतोऽपि नमामि यं वै,
तस्मात्पृथक्कमपि नो प्रणमामि देवम् ।
देवाग्रगण्यममरं यमहं च वन्दे,
स्तुत्वा तमद्रितनयेशमतीव [२४]मन्दे ॥१४६॥

२४. मन्दे=वन्दे ।

उग्रो मनोऽवतु ममेन्द्रियचालकं सः,
दृष्टिं च रक्षतु स मे भगवांस्त्रिनेत्रः ।
वीर्यं ममाऽवतु शिवः स कृशानुरेताः,
मृत्युञ्जयो जगति पातु च मे शरीरम् ॥१४७

मातां ममेयमिति मे जनकोऽयमस्ति,
पुत्रोऽयमस्ति कुलभक्तिकरी च पत्नी।
भक्त्या विनाशयति यो भवमोहमायां
तस्मै नमो भगवते वृषभध्वजाय ॥१४८॥

इच्छापुरे कबलि-नेल्लुरु-गुण्टुरूषु
लोका विशाखपतने हृदि यं जपन्ति ।
श्रीवर्धने च पुरि रत्नगिरौ सतारे
शीर्षे तु तस्य सलिलानि विमोचयन्ति ॥१४९॥

पापान्तकोऽसि शरणागतरक्षकोऽसि,
संसारतापशमनोऽसिं कृपाकरोऽसि ।
त्वामीश शर्व ! हृदि ये मनसा भजन्ति,
भक्ता हि ते पशुपतिं शिरसा नमन्ति ॥१५०॥

उत्साहवन्तमुमया सह योगवन्तम्,
संस्कारवन्तमरिवंशविनाशवन्तम् ।
सन्तानवन्तमिह यं मनसा स्मरामि,
तं पार्वतीश्वरमहं हृदि पूजयामि॥१५१॥

गौरीप्रियाय च भवाय महानटाय,
गङ्गाधराय च मृडाय महेश्वराय ।
मृत्युञ्जयाय गिरिशाय हतस्मराय,
तस्मै नमो भगवते वृषभध्वजाय ॥१५२॥

संन्यासयोगपरिघासु तपःक्रियासु
भोगान्विहाय जगतां कुरुते मनो यः ।
श्रद्धानते वसति यो विमले स्वभक्ते
गौर्याः शिवः स रमते हृदयेऽनुरक्ते ॥१५३॥

गोकर्ण-हासन-तनी-हरिकोटभूमौ
भक्ता महाबलिपुरे हृदि यं स्मरन्ति ।
श्रीरङ्गपत्तन-गणेशपुरादिभागे
तं शङ्करं हि विविध स्तुतिभिः स्तुवन्ति ॥१५४॥

पञ्चाम्बुभिस्त्रिपथगागतशम्बरैश्च
क्षिप्रापवित्रकमलैश्च महानदीकैः ।
कावेर्युदैः सुनदिकाऽद्भिरिहाञ्च्यते य-
स्तस्मै नमो भगवते वृषभध्वजाय ॥१५५॥

बोभूयते कविमनस्सु च यस्य सृष्टिः,
बोभोति शर्वविषये कृतिकारदृष्टिः ।
यस्ताण्डवं प्रकुरुते प्रलयार्थमीशः,
स त्रायतां मम कृतिं भगवान् गिरीशः॥१५६॥

मूर्खा भवन्ति पुरुषा महिलाश्च ते ताः,
ये यास्त्रिशूलिपदभक्तिरता न सन्ति ।
स्वान्तं कुरुष्व भगवन्निति यं भजामि,
तं पार्वतीश्वरमहं शिरसा नमामि ॥१५७॥

मुक्तिप्रदाय पतिताऽधमपावनाय,
लोकस्य भक्तिमनसो हरिधामदाय।
शर्वाय शैलपतिजाहृदयेश्वराय,
तस्मै नमो भगवते वृषभध्वजाय॥१५८॥

वित्तं गृहं च भवनं मम सर्वमेतत्,
सा प्रेमिका मम च तत्प्रणयी तथाऽस्मि ।
प्रीत्याऽत्र यस्य ममतापि विनाशमेति,
संसारमुक्तिरपरा शमदाऽत्र केति ? ॥१५९॥

मेशूर-कृष्णगिरि-चित्तुरु-बेङ्गलूरू-
मद्रास-धर्मपुर-काञ्चिपुरीषु भक्ताः ।
कोयम्बतूरुनगरे यमिह स्मरन्ति,
तं शम्भुमेव भगवन्तमिमे भजन्ति ॥१६०॥

संक्रान्तिमन्तमिह भक्तमनस्सु नित्यं
विश्रान्तिमन्तमनलस्य पुरः समाधौ ।
सम्पत्तिमन्तमुमया यमहं तु वन्दे,
नत्वा तमद्रितनयेशमतीव मन्दे ॥१६१॥

मोहे निपातय न मां भगवन् ! जगत्याः,
ज्ञानं प्रदेहि, मम येन भवेन्न जन्म ।
यं प्रार्थये परमतत्त्वमवाप्तुमीशं,
तं शङ्करं हृदि भजामि सदा सतीशम् ॥१६२॥

भूमण्डलं भवति यस्य शरीरभागः,
साकाशमुच्चतलमस्ति च यस्य शीर्षम् ।
सूर्येन्दुवह्निनयनः श्वसनानिलो य-
स्तस्मै नमो भगवते वृषभध्वजाय ॥१६३॥

गीर्वाणनिश्चरशिरोमणिघृष्टपाद !
भूतेश! देहि विजयं जहि चात्र शत्रून् ।
आरोग्यमेव दुरितापह ! देहि मह्यं,
मां सर्वशक्तिसहितं कुरु देव शम्भो ! ॥१६४॥

शास्त्रादिबोधमधिगम्य न यस्य लब्धि-
दानैस्तपोभिरपि नो व्रतकर्मभिः सा ।
त्यक्तेन्द्रियादिविषये हृदये यदाप्ति-
स्तस्मै नमो भगवते वृषभध्वजाय ॥१६५॥

त्रिश्शूर-कालिकट-कोच्चि-चिदम्बरेषु,
कोट्टायमे तिरु-अनन्तपुरेऽप्ययूरे ।
वेदारणे च मनुजा हृदि कुर्वते यं,
तं शङ्करं पशुपतिं सततं भजेयम् ॥१६६॥

यावत्प्रभो ! भवति नो मम जन्मनाश-
स्तावद्भवेद्धि हृदि मे तव भक्तिवासः ।
यं चिन्तयामि हृदि यं मनसा स्मरामि,
काव्येन तं शिवमहं परिकीर्तयामि ॥१६७॥

आर्यैरनार्यतनयैर्द्रविडात्मजैश्च,
विप्रैश्च शूद्रपुरुषैरपि राजपुत्रैः ।
वैश्यैश्च सर्वमनुजैः परिपूजिताय,
तस्मै नमो भगवते वृषभध्वजाय ॥११६८॥

विश्वासवन्तमपि भक्तकृतौ पतन्तम्,
सन्तापवन्तमिह दैत्यगणस्य चान्तम् ।
सम्मोदवन्तमदितेर्यमहं भजामि,
तं पार्वतीपतिमहं सततं नमामि ॥१६९॥

भक्तप्रियांय कविभिर्बहुवर्णिताय,
विश्वस्य संयमकराय विभूतिदाय ।
रुद्राक्षधारकवराय सदाशिवाय,
तस्मै नमो भगवते वृषभध्वजाय ॥१७०॥

कन्याकुमारि-मदुरै-शिवकाशिकासु,
तञ्जावुरे विलपुरेऽपि च पाण्डुचेर्याम्।
रामेश्वरे मुनिवरा हृदि यं स्तुवन्ति,
भक्त्या तमेवं गिरिजाधिपतिं नमन्ति॥१७१॥

आर्यैरनार्यपुरुषैरपि सेवितस्य,
हैमाद्रि-दक्षिणसमुद्रधरागतस्य ।
सर्वत्र सम्भवति यस्य भवस्य पूजा,
सर्वाधिका जगति भक्तजना हि तस्य॥१७२॥

रामेश्वरे वसति यो भगवांस्त्रिशूली,
रामेण रावणजयाय सुपूजितः सः ।
जीवेषु योऽत्र दयते सततं दयालुः,
भक्तान् स पातु निजभक्तमनश्शयालुः॥१७३॥

ओजस्विने विषयिने च तरस्विने च,
तेजस्विने चलयिने च मनस्विने च ।
सर्वात्मने विजयिने च यशस्विने च,
तस्मै नमो भगवते वृषभध्वजाय॥१७४॥

तत्त्वप्रयत्ननिरतः परमार्थभोगी,
कामादिभावविरतो भवसत्त्वभोगी ।
जिज्ञासुरेव लभते हृदि यत्स्वरूपम्,
प्रस्तौमि काव्यचरणैरिह तन्निरूपम् ॥१७५॥

लक्षावनौ च कविरत्ति-सुहेलपृथ्व्यां,
द्वीपाऽण्डमानधरणौ कचले तरासे ।
चाङ्गे च यो जयति दक्षिणलाहिचिह्ने,
तस्मै नमो भगवते वृषभध्वजाय ॥१७६॥

लक्षाऽण्डमानलघुदीर्घविखण्डभूमौ,
द्वीपस्थलोकजनपूजनवन्दनैर्यः ।
तत्रत्यसागरतरङ्गपयोभिरत्र,
सम्पूज्यते स भगवानिह यत्र तत्र ॥१७७॥

तेजस्विनं डमरुमन्तमनन्तभान्तम्,
सर्वान्तवन्तमतुलं निखिलान्तकान्तम् ।
यं शक्तिमन्तमनघं हृदये भजामि,
तं पार्वतीशपशुनाथमहं नमामि ॥१७८॥

निर्वस्त्रभक्तजनसेवितवन्दिताय,
हैमाद्रिजाहृदयमोदविवर्धकाय ।
दैत्यारये बलवते त्रिपुरान्तकाय,
तस्मै नमो भगवते वृषभध्वजाय॥१७९॥

देशे बहूनि गिरिजापति-मन्दिराणि,
यत्र प्रभिन्नमनुजैः फलपुष्पयुंक्ता ।
घण्टानिनादसहिता क्रियतेऽर्चना सा,
या पूजकैः स्तुतिमुखैः क्रियतेऽत्र भुक्ता ॥१८०॥

ये त्यागिभक्तपुरुषा बहुवर्गलोकाः,
व्यापारिणश्च कविभिः सह चित्रकाराः ।
कुर्वन्ति यस्य हि भवस्य सुदर्शनन्ते,
तस्य प्रभाववशशान्तिसुखे लभन्ते ॥१८१॥

प्राप्नोति यं न कृपणो न च कामभोगी,
मोही न हीन्द्रियजितोऽपि न कर्मयोगी ।
लोभी न चिन्तयति यं भवबन्धनात्तः,
संन्यासचित्तरमणो लभते तमाप्तः ॥१८२॥

लौकैर्हिमालयहिमैर्दिशि चोत्तरस्यां
भङ्गैः सुदक्षिणजहिन्दमहार्णवीयैः ।
प्राचीस्थपश्चिमसमुद्रतटेऽर्च्यते य-
स्तत्पूजनस्तुतिपदाप्तरसे रमेय ॥१८३॥

माङ्गल्यवन्तमसुमङ्गलसूत्रवन्तम्,
सौभाग्यवन्तमपराऽमलकान्तिमन्तम् ।
विज्ञानवन्तमधुना यमहं प्रपद्ये,
स्वं तेन दर्शयितुमत्र शिवेन गद्ये ॥१८४॥

भक्तार्चिताय शरणागतचिन्तकाय,
मौनीश्वराय भवसागरतारकाय ।
श्रीमच्छिवाय मुनिपुङ्गवपूजिताय,
तस्मै नमो भगवते वृषभध्वजाय॥१८५॥

यं [२५]काष्ठमण्डपजना नयपालदेशे
स्तोत्रैः शिवं पशुपतिं नितरां स्तुवन्ति ।
यं संस्मरन्ति विविधं भुवि हिन्दुलोका-
स्ते तं सदा हृदि भजन्ति तथा जपन्ति॥१८६॥

हे देव ! पाहि शिव शङ्कर ! मां सदेति,
[२६]सूरी-फिजीप्रभृतिहैन्दवराष्ट्रलोकाः ।
[२७]मारीचदेशमनुजा अपि यं स्मरन्ति,
तं शम्भुमेव भगवन्तमिमे नमन्ति॥१८७॥

तीर्थेषु कर्मसु वनेषु न मन्दिरेषु,
चर्चेषु नो वसति यो न च मस्जिदेषु।
यो भक्तचेतसि करोति निवासमीशः,
स त्रायतां जगदिदं भगवान् सतीशः ॥१८८॥

---

२५. काष्ठमण्डपः=काठमाण्डू। २६. सूरी=सूरीनामदेशः।
२७. मारीचदेशः=मौरीशस।

सत्येन कष्टतपसा यदहिंसया च,
दानेन पुण्यविधिना शुभकर्मणा च।
प्राप्नोति भक्तहृदयं परमार्थतत्त्वं,
तस्मै नमो भगवते वृषभध्वजाय॥१८९॥

प्राकाम्यवन्तमणिमामहिमादिमन्तम्,
ईशित्वलब्धिगरिमालघिमादिमन्तम् ।
सिद्धीशमेमि यमहं च वशित्ववन्तम्
शर्वं नमामि तमहं गलसर्पवन्तम् ॥१९०॥

मध्यप्रदेशगविलासपुरस्य पार्श्वे,
मन्थारिनामकनदीतटटालभूमौ ।
यः शङ्करो लसति ताण्डवनृत्यवेशः,
स त्रायतां जगदिदं भगवान्महेशः ॥१९१॥

कश्मीर-बङ्ग-गुजरात-मिजोरमेषु
कर्णाटके तमिलनाडु-वनाङ्गभूम्योः ।
सम्पूर्णभारततले परिपूज्यते य-
स्तत्पूजया जगति शान्तिसुखे लभेय ॥१९२॥

मुम्बापुरे वसति यो भगवानुमेश-
स्तं त्वङ्कलेश्वरमहं शिरसा नमामि ।
ओङ्कारनाथ इह सोऽस्त्यमलेश्वरो य-
तस्मै नमो भगवते वृषभध्वजाय॥१९३॥

यश्चाऽऽदिवासिजनपूजितपूतपादो
ग्रामे कृपां स कुरुते त्विह साबलाख्ये।
वेणेश्वराय वनवासिशरीरपाय,
तस्मै नमो भगवते वृषभध्वजाय॥१९४॥

वैदर्भ-मालवजभिल्लभवाः समेताः,
माहीतिसोमनद-जाखमसङ्गमस्थम् ।
वेणेश्वरं यमिह चाऽऽदिजना नमन्ति,
तं के न हैमगिरिजादयितं स्तुवन्ति ॥१९५॥

यस्मिन्दिने भवति शङ्करमेलकोऽत्र
सा पूर्णिमा तिथिशुभाऽस्ति हि माघमासे ।
सम्मर्द आव्रजति यस्य सुदर्शनाय,
तस्मै नमो भगवते वृषभध्वजाय॥१९६॥

माहीजलानि नदसोमपयांसि केचिद्
अन्ये च जाखमनदीसलिलानि तस्मिन्।
केऽप्यत्र सङ्गमपयांसि निपातयन्ति,
सर्वे सतीशमिह तं गिरिशं भजन्ति ॥१९७॥

एका गुहा जयपुराऽलवरीयमार्गे,
तस्यां निवासमकरोन्नलदेश्वरस्तु ।
यस्मिन् सदा भवति शंवरविन्दुपातः,
शर्वस्य तस्य लघुलिङ्गगणोऽत्र जातः ॥१९८॥

तत्कन्दरोच्चशिखरात्प्रकृतिः शिवेयम्,
यं प्रीतिविन्दुभिरथो पुरुषं शिवं स्वम्।
अन्तर्मुदा स्नपयतीह नगात्मजेशम्,
तल्लिङ्गमर्चति च सा पयसा शिवेशम् ॥१९९॥

तैर्विन्दुभिश्च पयसां सततं पतद्भि-
र्लिङ्गानि यस्य विविधानि बहून्यभूवन् ।
यो लिङ्गवान्सृजति विश्वसुतं ह्युमायाम्,
सूतां शिवः स सततं स्वशिवं शिवायाम् ॥२००॥

घुश्मेश्वरो य इह राजधरा-शिवाडे,
तं त्र्यम्बकेश्वरमये महराष्ट्रमध्ये ।
रामेश्वरस्तमिलकीर्तिकरो य उक्तः,
भक्तान् सुरक्षितुमहो! स शिवोऽत्र शक्तः ॥२०१॥

ओङ्कारनाथमथ नार्मदकूलसंस्थम्,
वाणीप्रदं डमरुनादविभिन्नसूत्रम् ।
यं भक्तवत्सलमहं हृदये स्मरामि,
तं सर्वभारतशरीरमहं नमामि ॥२०२॥

रामेश्वराय हरये नलदेश्वराय,
विल्वेश्वराय मयराष्ट्रजनेश्वराय ।
द्रोणेश्वराय च नमष्टपकेश्वराय,
तस्मै नमो भगवते वृषभध्वजाय ॥२०३॥

सा द्रोणभूः परमसुन्दररम्यभूमिः,
द्रोणो हि यत्र शिवसेवनकर्म चक्रे ।
देवेश्वरो गुरुगुरुस्त्विह पूज्यते यः,
कीर्तिस्तवैः सुकविभिर्भगवान्स गेयः ॥२०४॥

हे द्रोण ! मन्त्रसहितां पठ शस्त्रविद्याम्,
सञ्चालयेः शरविधीनपि मे जगत्याम् ।
इत्थं गुरुस्तमिह शिष्यमशिक्षयद्यः,
शत्रून्विनाशयतु वो भगवान्स सद्यः ॥२०५॥

द्रोणेन यः पशुपतिः परिपूजितोऽभूत्,
अद्योच्यते स भगवान् टपकेश्वरो हि ।
यो द्रोणभूमिममरामजरां करोति,
भक्त्या शिवः स इह भक्तयशस्तनोति ॥२०६॥

यत्कन्दरे वसति टोंसतटे स तस्मिन्,
शैलात्पतन्ति पृषताः पयसां हि यस्मिन् ।
लोकान् सुरक्षति सदा टपकेश्वरो यः,
प्रासादयत्यपि च तं लघुगाङ्गतोयः ॥२०७॥

कुल्लौ च मन्थनपुरे भगवाञ्छिवो यः,
विद्युत्पतिर्जनमुखैरिह कथ्यते सः ।
येनात्र दानवकुलान्तवधः कृतो हि,
काव्ये शिवः स भगवान् कविना स्मृतो हि॥२०८॥

उच्चैः स्तवैरिह च फाल्गुनकृष्णपक्षे,
सर्वः करोति हि महाशिवरात्रिपूजाम् ।
यस्यात्र गुञ्जति यशो जयकारशब्दैः,
शम्भुः प्रसीदति सदा स तपोभिरब्दैः ॥२०९॥

विद्युत्प्रकाशयति यं सततं नभस्तः,
आलिङ्गतीह यमहो ! च कदाचिदेत्य ।
यं विद्युदीश्वरमतो वदति प्रदेशः,
केदारनाथ इह पातु स वो महेशः ॥२१०॥

द्रोणेश्वरं च शुभदं टपकेश्वरं च,
श्रीविद्युदीश्वरविभुं नलदेश्वरं च ।
केदारनाथमपि यं मनसा स्मरामि,
तं शङ्करं विविधरूपमहं नमामि ॥२११॥

विद्युद्भवाय गिरिजापतये हराय,
वेणेश्वराय वनमानुषरक्षकाय ।
नागेश्वराय भुजगेश्वरवल्लभाय,
तस्मै नमो भगवते वृषभध्वजाय॥११२॥

अत्रैव शैवनगरे मयराष्ट्रनाम्नि,
कैलाशवासिगिरिजेश्वर ईश आस्ते ।
यं पिप्पलेश्वरमहं हृदि धारयामि,
केदारनाथमिह तं शिरसा नमामि ॥२१३॥

सोरोंपुरेऽत्र नवमीदिवसे ह्युदीच्यां
यत्स्नामि दुग्धसलिलैरिह शुक्लचैत्रे ।
प्रातश्च यं मनसि तत्रगतः स्मरामि,
दुग्धेश्वरं शिवमहं हृदि तं भजामि ॥२१४॥

यन्मन्दिरं स्थितमये ! शृणु भद्रपुर्यां
जागेश्वरो वसति तत्र सहस्रलिङ्गी ।
यं पार्वतीप्रकृतयो महिलाः श्रयन्ति,
रत्या तमेव हृदयेषु निवासयन्ति ॥२१५॥

कल्याणकारिणमुमेश्वरमर्गलेशम्,
कालिन्दिकेश्वरमपर्णमगन्धकेशम् ।
सौरायणेश्वरमहं हृदि यं धरामि,
तं पार्वतीश्वरमहं शिरसा नमामि ॥२१६॥

आभीरनाथ इह रक्षति खेकड़ायाम्
आत्मप्रजामनुदिनं स्तुतिकीर्तिरीशः ।
अश्वत्थनाथमजरं हृदि यं जपामि,
तं भूतनाथममरेशमहं नमामि ॥२१७॥

जागेश्वराय रमणीरमणेश्वराय,
दुग्धेश्वराय युवतीयुवकेश्वराय ।
लिङ्गेश्वराय जनमानसहर्षदाय,
तस्मै नमो भगवते वृषभध्वजाय ॥२१८॥

यं नीरबुद्बुदसमं बहुचञ्चलं च,
मायाकृतं विविधदुःखजवाकरं च ।
शूलेन नाशयति भक्तभवं भवे य-
स्तुत्वा शिवं तमिह शर्मसुखे लभेय ॥२१९॥

ये संस्कृतं मृतमिहाऽऽहुरहो ! जडास्ते,
तत्राऽद्य काव्यरचनाः कविभिः क्रियन्ते ।
तज्जीवितं जगति यत्कृपया विभाति,
भर्गः स भक्तभवनं भगवान् प्रभाति ॥२२०॥

क्रोधं सकाममपि मोहमतीव लोभं
तृष्णां मदं च शिव ! नाशय मत्सरं मे।
मह्यं प्रदेहि निजपादसरोजभक्तिं
संसारमोक्षमपि मे कुरु सर्वदेव ! ॥२२१॥

यज्ञोपवीतमिह रक्षतु शङ्करो मे,
स्वादं विनाश्य जगतो मम शङ्करोतु।
कीर्तिं प्रसारयतु मे जगतीगृहेषु,
लोके ततो भवतु मे हि पुनर्न जन्म॥२२२॥

गङ्गापयःपतनपूतशरीरवन्तम्,
आचारवन्तमरुणाभकरादिमन्तम् ।
ईशं स्मरामि यमहं मुनियोगवन्तम्,
शर्वं नमामि तमहं निधिसिद्धिमन्तम् ॥२२३॥

आचार्यवर्यकविरामकिशोरमिश्रो
यद्वन्दनं व्यरचयद् वृषभध्वजस्य ।
तत्पाठकाय भुवि योऽत्र सुखानि दत्ते,
तस्मै नमो भगवते वृषभध्वजाय॥२२४॥

शुद्धात्मकाय सगुणाय च निर्गुणाय,
श्यामाङ्गलिप्तमृतमर्त्यविभूतिभाय ।
भक्तप्रपञ्चभवमृत्युनिवारकाय,
तस्मै नमो भगवते वृषभध्वजाय ॥२२५॥

भारत उत्तरप्रदेश एटाजनपद-सोरोंवासी,
कालाऽब्धिखाऽऽत्म (२०४३)विक्रमवर्षे खेकड़ायां वासवान्,
होतीलालकलावत्योः सुतरामकिशोरमिश्र इह,
श्रीवृषभध्वजसपादशतकद्वयीं कृतिं विरचितवान् ॥२२६॥

❖❖❖

त्रैस्त्रोतसम्

—श्री श्री०सुन्दरराजः आई०ए०एस० (प्राप्तावकाशः)
२१, एकाम्रविहारः, वी०आई०पी० कालोनी, नयापल्ली, भुवनेश्वर-७५१०१५

वियन्नदि! दयामयीमनिपुणोऽपि यस्त्वां कविः
तरन्निह भवं तव प्रसदनेन तुष्टूषति ।
प्रसन्नमुखपंकजा प्रदिशसि प्रवाहं गिरां
त्वमस्य सपदि स्वयं निजजलप्रवाहोपमम् ॥१॥

अहं दिविषदापगे कविबुभूषया त्वां जडः
महर्षिमहितां मितैर्निजवचोभिरद्य स्तुवे ।
प्रसीद मयि जाह्नवि प्रदिश वाचमर्थान्वितां
यथा रचयितुं स्तवं तव यथातथं स्यां क्षमः ॥२॥

क्वचित्त्वरितगामिनी दयितसंगमोत्कण्ठया
भवस्यलसगामिनी क्वचन लज्जया कुण्ठिता ।
फलैस्तटतरुच्युतैरपि सुमैः पयो बिभ्रती
स्वयं सुरतरंगिणी विजयसे यथार्थाभिधा ॥३॥

सितेतरसरीसृपी कुटिलगामिनी काचन
यथा त्रिपथगे गिरीन् प्रवहसे परीवृण्वती ।
समुद्रमथने पुरा वलितमन्दरं वासुकिं
स्मरेयुरमरा दिवस्तदवलोकनेन ध्रुवम् ॥४॥

विजृम्भ्य विपुला क्वचित् क्वचन लम्भिता क्षुद्रतां
हिमाद्रिकुहरान्तिके वहसि लक्षितालक्षिता ।
स्वयं त्रिदशनिम्नगे निपतितः पुनर्निर्गतः
पुरा विवृतसिंहिकावदनतो यथा मारुतिः ॥५॥

त्रिविष्टपसरिद्वरे त्वदुदयाद्रिगंगोत्तये
यथा बदरिकाश्रमं प्रति तथा हृषीकेशतः ।
निदाघसमयेऽथवा शरदृतौ क्रियात्प्रस्थितिं
यथा प्रतिनिवर्तनं हिमनिपाततः प्राग्भवेत् ॥६॥

नरेन्द्रपुरमध्यतो नगपथेन गत्वा ततो
व्यतीत्य विविधापणैर्विलसितां स चम्बापुरीम् ।
महीध्रशिखरावलिं पथि निरीक्षमाणः पुरः
क्रमेण टिहरीपुरीमथ नरस्समासीदति ॥७॥

प्रशासकगणैरितो बहु विचिन्त्य भागीरथी-
नदीमधि विधीयते सलिलबन्ध एको महान् ।
परं विवदनैरयं महति पातितस्संशये
भविष्यति विनिर्मितः किमु कदेति न ज्ञायते ॥८॥

इतस्तटगिरिः क्षरज्झरवलक्षरेखांकितो
निबद्ध इव रज्जुभिर्निशिचराधमैर्मारुतिः ।
मतंगजवरो महान् मदजलैस्स्वगात्रस्नुतैः
यथा विजयतेऽथवा धवलभक्तिरेखांकितः ॥९॥

नदीमधि मिलत्यमूमुपनदीह भागीरथीं
रयेण टिहरीपुरीपरिसरे पुनः काचन ।
वदन्ति वनवासिनस्तदभिधेति भिल्लांगना
वदन्त्यपि बिलांगनेत्यथ तदीयनामापरे ॥१०॥

यदीयतटयोर्द्वयोरधिमहीधरोपत्यकां
बिलं बहुवनावृतं जयति भिल्लसंसेवितम् ।
कथं भवतु निर्णयस्तदभिधां यथार्थां प्रति
भवेदपि बिलांगनेत्यपि भवेच्च भिल्लांगना ॥११॥

त्रयं हिमगिरौ मिलत्यमरवाहिनीस्त्रोतसां
मिलत्यलकनन्दया प्रथममेत्य मन्दाकिनी ।
युनक्ति तदनन्तरं सरिदुपेत्य गंगोत्रितो
भगीरथतपःफलप्रसरिताऽत्र भागीरथी ॥१२॥

सरित्त्रितयमेलनात्परमुदेति गंगानदी
यदीयसलिलं नृणां भवति भक्तिमुक्तिप्रदम् ।
त्रयीव भुवि पावनी त्रिदशसेव्यमूर्तित्रयी
समं समुदितेव सा प्रवहति त्रयी स्त्रोतसाम् ॥१३॥

त्रिलोकमहिते हिते त्रिपथगे हरद्वारि ते
प्रदर्शयति सन्ध्यया य इह हारवर्तिं सकृत् ।
लुठन्तमपि संसृतौ तमिह मोहतम्यां चिरं
विमोचयसि सत्वरं करुणयाम्ब गंगे स्वयम्॥१४॥

❖❖❖

श्रीकृष्णस्तोत्रम्

—डा० अवधेश पाण्डेयः
अध्यक्षः संस्कृत विभागः
आर०सी०एस० कॉलेज मंझौल,
(मिथिलाविश्वविद्यालयस्य अंगीभूत एकांशः)
बेगूसरायः (बिहार) ८५११२७

वंशीनादैस्तरणितनुजायास्तटे मन्दमन्दैः,
लोकान्सर्वान्द्रुतविजयकैर्मादयद्भिः सुधाक्तैः ।
मच्चेतो यो हरति मृगतुल्यं स्वपादाब्जपाशो,
वन्दे कृष्णं तमहमनिशं राधया राजमानम् ॥१॥

कान्तं शान्तं नयनसुभगं कोटिकामोपमेयं,
मेघश्यामं ललितवदनं कुञ्चितैः कुन्तलाङ्गैः ।
राधाकान्तं कमलनयनं राधयालिङ्ग्यमानम्,
वन्दे नित्यं भवभयहरं कृष्णमानन्दकन्दम् ॥२॥

यो वै कृष्णः स्वशिरमुकुटे चित्रमायूरपक्षान्
पाणौ वंशीं तनुषि सुभगे दिव्यपीताम्बरञ्च ।
भाले रम्यं तिलकमुरसि स्वच्छवैदूर्यमाल्यं,
सुश्रुत्योर्वै धरति चपले कुण्डले तं नमामि ॥३॥

श्रीराधाया अमृतमधुरैर्नूपुराणां सुतालैः,
वंशीनादैस्तरणितनुजायास्तटं गुञ्जयंश्च ।
मित्रैः क्रीडन् विहरति मुदा मन्दमन्दं हसन्यः,
सः श्रीकृष्णो विहरतु सदा मे मनोमन्दिरे वै ॥४॥

वृन्दारण्ये प्रकृतिललिते चारिताः येन गावः,
बालैर्गोपैः सह च विविधाः दर्शिताः रम्यखेलाः ।
गोपीभिर्वै सह रसयुताः स्वीकृताः रासलीला-
स्तं श्रीकृष्णं परमसुखदं ब्रह्मरूपं नमामि ॥५॥

कालिन्द्याः वै विषधरवरं कालियं नागराजं,
दान्त्वा त्राताः निजसहचराः येन वृन्दावनाङ्के ।
शान्त्वासौ मे बहुविषमयं पापनागाधिराजं,
कृष्णस्त्राता भवतु भुवने भूरिशस्तं नमामि ॥६॥

धृत्वाङ्गुल्यां दृढगिरिवरं येन गोवर्द्धनाख्यम्
इन्द्रे क्रुद्धे व्रजजनगणो रक्षितो घोरवृष्ट्याः ।
पापानां मे दृढनगवरं शीघ्रमुत्थाप्य हस्ते,
क्रुद्धे दैवे त्ववतु भुवि मामेष दुःखौघवृष्ट्या ॥७॥

प्रेमासक्ताः विरहविधुराः यद्वियोगे रुदन्त्यः,
हाहा कृष्णेतिरटनविवशाः मूर्च्छयन्त्यो भृशञ्च ।
अस्मान्त्यक्त्वा कथय च कथं त्वं गतः शत्रुभूमिम्,
जल्पन्तीत्थं करुणवचसा गोपिकास्तं नमामि ॥८॥

वेदं शास्त्रं नवरसमयं नैव जाने सुकाव्यं,
पूजां ध्यानं भजनमपि नाहञ्च जाने सुपाठम् ।
कृष्णादन्यं न च कमपि जाने सुरेशं शरण्यम्,
आर्तैर्नादैर्द्रवितमनिशं कृष्णमेकं भजामि ॥९॥

○○○

नीराजनम्

–डॉ० विन्ध्येश्वरीप्रसाद मिश्रः "विनयः"
प्राध्यापकावासः विक्रम वि०वि० परिसरः, कोठी, उज्जैन–४५६०१०

वृत्तिरेषा वर्तिका स्नेहो घृतं हृद्राजनम् ।
नन्दनन्दन ! हे हृदयधन, ते सखे ! नीराजनम् ॥
चञ्चलारुणचरणविचरण
रे क्षणं, व्रज मा व्रजं त्वम्
रणरणकमिममद्य मे
सुमनोञ्जलेर्मत्वा स्रजं त्वम्
धारयाङ्ग सुवक्षसि स्वीकुरु यथाऽस्ति तथा जनम् ।
नन्दनन्दन ! हे हृदयधन, ते सखे ! नीराजनम् ॥
हे धराधरधारणैकधुरीण
माधुर्याम्बुराशे !
राधिकायाः प्राणवल्लभ !
मनः स्यात्ते चित्प्रकाशे
मामपि स्वीयैः समं नय नयनधन ! वृन्दावनम् ।
नन्दनन्दन ! हे हृदयधन, ते सखे ! नीराजनम् ॥
रास-हास-विलासलीलालोल
हे हिन्दोलचारिन्,
मुरलिकाकलगानकोविद
तरणिजातटनट ! विहारिन् !!
नवलधवलाम्बरनिवीत कलानिधे ! कुरु नर्तनम् ।
नन्दनन्दन ! हे हृदयधन, ते सखे ! नीराजनम् ॥
श्यामसुन्दर ! मदनमोहन
कृष्ण विष्णो हे मुरारे !
ब्रह्मणि त्वयि वृत्तयो मे
सङ्गताः स्युस्तत्त्वसारे,
देवकीसुत वासुदेव हरे, त्वदीयं वन्दनम् ।
नन्दनन्दन ! हे हृदयधन, ते सखे ! नीराजनम् ॥

अर्वाचीनसंस्कृतस्य विज्ञापनशुल्कम्

आवरणपृष्ठस्य	२०००.०० प्रतिपृष्ठम्
इतरपृष्ठस्य	१०००.०० प्रतिपूर्णपृष्ठम्
अर्धपृष्ठस्य	५००.००

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम् (२००१तः प्रभावि)

संस्थानां कृते	वार्षिकं (भारते) रु० १००.००	
	वार्षिकं (विदेशेषु) यू०एस० डालराः १५	
	आजीवनं (भारते) रु० ८००.००	
	आजीवनं (विदेशेषु) यू०एस० डालराः १५०	
व्यक्तीनां कृते	वार्षिकं (भारते) रु० ५०.००	
	वार्षिकं (विदेशेषु) यू एस० डालराः १५	
	आजीवनं (भारते) रु० ५००.००	
	आजीवनं (विदेशेषु) यू०एस० डालराः १५०	
डाकव्ययः	यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीनसंस्कृतस्य सर्वेऽप्यंकाः प्रेष्येरन्,	
	भारते	रु० ८०.००
	विदेशेषु	यू०एस० डालराः ४०

विगतांकानां (Back Volumes) प्रतिवर्षम् मूल्यम् रु० १००/— २० डालरा वा

देववाणी—परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते । किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात् । ग्राहकाः ग्राहकशुल्कम् 'अर्वाचीनसंस्कृतम् (Arvacheenasanskritam) इत्यंकितेन दिल्ल्यां/नवदिल्ल्यां प्रदेयेन बैंकड्राफ्टेन/धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते :—

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी—परिषद्, दिल्ली
आर—६, वाणी—विहारः, नयी दिल्ली—११००५९ (भारतम्)

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

ग्रन्थांकः	ग्रन्थः	लेखकः	मूल्यम्
23.	राधाकृष्णरसायनम्	(श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० 150.00
28.	स्फूर्तिसप्तशती	(डा० शिवदत्तशर्मा चतुर्वेदी)	रु० 150.00
29.	साहित्यकौतुकम्	(पं० टी०वी० परमेश्वर अय्यरः)	रु० 150.00
32.	श्रीबदरीशसुप्रभातम्	(डा० सी०आर स्वामिनाथन्)	रु० 10.00
42.	पुरश्चरणकमलम्	(नाटकम्) (डा० रमाकान्त शुक्लः)	रु० 10.00
44.	रसदर्शनम्	(डा० रमेशचन्द्र शुक्लः)	रु० 150.00
45.	संस्कृत साहित्य में राष्ट्रिय भावना	(डा०हरिनारायण दीक्षित)	रु० 400.00
47.	भाति मौरीशसम्	(डा० रमाकान्त शुक्लः)	रु० 10.00
49.	कूहा	(काव्यम्) (डा० उमाकान्त शुक्लः)	रु० 60.00
53.	सारस्वतसमुन्मेषः	(डा० विन्ध्येश्वरीप्रसाद मिश्र 'विनयः')	रु० 60.00
59.	अध्यात्मरामायण में अध्यात्म-चिन्तन	(श्री त्रिगुणानन्द शुक्ल)	रु० 150.00
64.	लक्ष्मीशतकम्	(डा० वरदाचार्य कण्णन्)	रु० 60.00
65.	ऋतम्	(उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० 60.00
72.	श्रीगान्धिचरितम्	(प्रो० चारुदेव शास्त्री)	रु० 150.00
74.	दूतप्रतिवंचनम्	(डा० इच्छाराम द्विवेदी)	रु० 60.00
75.	भाति मे भारतम्	(काव्यम्) (डा० रमाकान्त शुक्लः)	रु० 110.00
81.	नाट्यसप्तकम्	(नाटकम्) (डा० रमाकान्त शुक्लः)	रु० 200.00
82.	जय भारतभूमे !	(काव्यम्) (डा० रमाकान्त शुक्लः)	रु० 30.00
83.	श्रीहनूमत्पञ्चाशत् तथा शरणागतिषोडशी	(श्री श्री०सुन्दरराजः)	रु० 10.00
84.	भारतजनताहम्	(कवितासंग्रहः यन्त्रस्थः)(डा० रमाकान्तशुक्लः)	रु० 200.00
85.	सत्प्रेरणानाटकम्	(डा० इच्छाराम द्विवेदी 'प्रणवः')	रु० 100.00
86.	निस्यन्दिनी	(संस्कृतगीतसंग्रहः)(डा०जनार्दनप्रसाद पाण्डेयः'मणिः')	रु० 100.00
87.	श्रीजगन्नाथसुप्रभातम् तथा अन्यानि स्तोत्राणि	(श्री० सुन्दरराजः)	रु० 50.00
88.	कवितावलिः	(अनुवादकाव्यम्)(डा० प्रेमनारायण द्विवेदी)	रु० 100.00

देववाणी-परिषद्, दिल्ली आर-6 वाणी विहारः, नई दिल्ली-110059 फोन : 5639146

"देववाणी-परिषद्, दिल्ली"-कृते डा० रमाकान्तशुक्लेन "प्रवीण प्रिंटिंग सर्विस, उत्तम नगर, नई दिल्ली-११००५९ फोन : ५६४०३२४" इति मुद्रणालये मुद्रापयित्वा "आर-६, वाणी विहारः, नई दिल्ली-११००५९" तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (२३/१) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५-१-२००१ अस्यांकस्य मूल्यम् रु० २५-००
Rs. 25.00